सा पुनः सुजने कृता अनघा पाषाणरेखेव ।।)

—*GS* III. 72

---

1) *Alaṁkāraratnākara* of Sobhākaramitra ed by Prof. C. R. Devadhar, pub. by Orienta Book Agency, Poona, 1942.

4) ......*Upamā*...... (p. 8, v. 24)

अदंसणं विअ सुअणस्स दंसणं दुज्जणस्स दूसेइ ।
तं चिअ संपइ सुलहं अहो कलिआलमाहप्पं ॥
(अदर्शनमिव सुजनस्य दर्शनं दुर्जनस्य दूषयति ।
तदेव संप्रति सुलभमहो कलि-काल-माहात्म्यम् ॥)

5) ......*Ananvayaḥ*...... (p. 10 v. 28)

एद्दहमेत्ते भुवणे सुंदर-महिला-सहस्स-संकिण्णे ।
अणुहरइ णवर तिस्सा वामद्धं दाहिणद्धस्स ॥
(एतावन्मात्रे भुवने सुन्दर-महिला-सहस्र-संकीर्णे ।
अनुहरति केवलं तस्या वामार्धं दक्षिणार्धस्य ॥)

—Cf. *GS* IV. 3

6) ......*Asamaḥ*...... (p. 11, v. 30)

ढुंढुल्लंतु/ढंढुल्लितु मरीहिसि/मरीहसि कंटअ-कलिआइ केअइ-वणाइं ।
मालइकुसुमसरिच्छं भमर भमंतो ण पाविहिसि ॥
(भ्राम्यन् (? गवेषयन्) मरिष्यसि कण्टक-कलितानि केतकीवनानि ।
मालती-कुसुमसदृशं भ्रमर भ्रमन्/भ्राम्यन् न प्राप्स्यसि ॥)

—*DHV Locna*, p. 274

7) ......*Pratimā*...... (p. 14, v. 41)

अंगे पुलअं अहरं स-वेविअं जंपिअं स-सिक्कारं ।
सव्वं सिसिरेण कअं जं काअव्वं पिअअमेण ॥
(अङ्गे पुलकमधरं स-वेपितं जल्पितं स-सीत्कारम् ।
सर्वं शिशिरेण कृतं यत् कर्तव्यं प्रियतमेन ॥)

Cited, later by Jayaratha in his *Vimarśini*, p. 98

8) ......*Taralāviehi daravia*...... (p. 15)

तरलाविएहि दर-विअसिएहिं तरुणीण णअण-कमलेहिं ।
अच्चिज्जसि अणुदिअहं जुआण को होसि मअणस्स ॥
(तरलितैर्दर (दर = ईषद्-) विकसितैः तरुणीनां नयनकमलैः ।
अर्च्यसे अनुदिवसं युवन् को भवसि मदनस्य ॥)

9) ......*Pratimā*...... (p. 15, v. 45)

णव-पुण्णिमा-मिअंकस्स सुहअ कोत्तोसि(? को तं सि)भणसु मम सच्चं ।
का सोहग्ग-समग्गा पओस-रअणि व्व तुह अज्ज ।।
(नव-पूर्णिमा-मृगाङ्कस्य सुभग कस्त्वमसि भण मम सत्यम् ।
का सौभाग्य-समग्रा प्रदोष-रजनीव तवाद्य ।।)

—first cited in *KP* IV. 898

10) ......*Apahnuti*...... (p. 15, v. 46)

जो सरहस-पिअ-परिरंभ-पसरिआणंद-परिमलो हिअए ।
सो च्चिअ मुत्ताहारो सीअल-सरसो ससिमुहीणं ।।
(यः सरभस-प्रिय-परिरम्भ-प्रसारिता(?प्रसृतो)नन्द-परिमलो हृदये ।
स एव मुक्ताहारः शीतल-सरसः शशिमुखीनाम् ।।)

11) ......*Dṛṣṭāntaḥ*...... (p. 19, v. 62)

दढ-रोस-कलुसिअस्स वि सुअणस्स मुहाहि विप्पिअं कत्तो ।
राहु-मुहम्मि वि ससिणो किरणा अमअं चिअ मुअंति ।।
(दृढ-रोष-कलुषितस्यापि सुजनस्य मुखाद् विप्रियं कुतः ।
राहु-मुखेऽपि शशिनः किरणा अमृतमेव मुञ्चन्ति ।।)

—*GS* IV. 19

12) ......*Vaidharmyeṇa* (*dṛṣṭāntaḥ*) *yathā*...... (p. 20, v. 64)

विसमम्मि वि अविसण्णो धारअइ धुरं धुरंधरो जेव्व ।
ण हु दिणअरोवराए दिणस्स होइ अवलंबणं(?वलंबणँ)ससिबिंबं ।।
(विषमेऽप्यविषण्णो धारयति धुरं धुरन्धर एव ।
न खलु दिनकरोपरागे दिनस्य भवत्यवलम्बनं शशिबिम्बम् ।।)

13) ......*Nidars'anā*...... (p. 21, v. 69)

तुह चंडि गंडवाली पहुप्पमाणेण अरुणभावेण ।
बालातवाहएसु हिंडिज्जइ कमल-किसलएसु ।।
(तव चण्डि गण्डपाली प्रभवतारुणभावेन ।
बालातपाहतेषु हिण्डते(= अटति, विचरति)कमल-किसलयेषु ।।)

14) ......*Vinodaḥ*...... (p. 24, v. 78)

तक्खण-विहल-परम्मुह-गोरि-कओल-तलम्मि संभरिए ।
ओयारिऊण बहुसो दीसइ मउड-ससि-खंडो ।।
(तत्क्षण-विह्वल-पराङ्मुख-गौरी-कपोल-तले संस्मृते ।
अवतार्य बहुशो दृश्यते मुकुट-शशि-खण्डः ।।)

15) ......*Vinodaḥ*...... (p. 24, v. 80)

णरणाह तुज्झ कित्तिप्पवाहमवलोइऊण दीहअरं ।
अम्हेहि अज्ज गमिआ छीरो (खीरो) अहि-दंसणोक्कंठा ॥
(नरनाथ तव कीर्तिप्रवाहमवलोक्य दीर्घतरम् ।
अस्माभिरद्य गमिता क्षीरोदधिदर्शनोत्कण्ठा ॥)

16) ......*Vinodaḥ*...... (p. 24, v. 81)

बहुसो वि कहिज्जंतं तुह वअणं मज्झ हत्थ-संदिट्ठं ।
न सुअं ति जंपमाणा पुणरुत्त-सुअं/सअं/कुणइ अज्ज/अज्जा/अज्झा ॥
(बहुशोऽपि कथ्यमानं तव वचनं मम हस्त-संदिष्टम् ।
न श्रुतमिति जल्पन्ती पुनरुक्त-श्रुतं/करोत्यद्य/करोत्यार्या ॥)

—*GS* II. 98

17) ......*Pratīpam*...... (p. 29 v. 95)

मुद्धे किं विअ कीरइ कुवलअ-कण्णोलिआएँ एआए ।
ईसिं पहुत्तमेके कडक्खए पप्फुरंतम्मि ॥
(मुग्धे किमिव क्रियते कुवलय-कर्णोल्लिकया एतया (कुवलयावतंसेन एतेन) ।
ईषत् प्रभुत्वमेकस्मिन् कटाक्षके (= कटाक्षे) प्रस्फुरति ॥)

18) ......*Pratīpam*...... (p. 29 v. 96)

तुह मुह-सारिच्छं ण लहइ त्ति संपुण्ण-मंडलो विहिणा ।
अण्णमअं व्व घडइउं पुणो वि खंडिज्जइ मिअंको ॥
(तव मुख-सादृश्यं न लभत इति संपूर्णमण्डलो विधिना ।
अन्यमयमिव घटयितुं पुनरपि खण्डयते मृगाङ्कः ॥)

—*GS* III. 7

19) ......*Pratīpam*...... (p. 30 v. 101)

णिद्द च्चिअ वंदिज्जउ किं कीरइ देवआहिं अण्णाहिं ।
जिइ प्पसाएण पिओ लब्भइ दूरे वि णिवसंतो ॥
(निद्रैव वन्द्यताम् किं क्रियते देवताभिरन्याभिः ।
यस्याः प्रसादेन प्रियो लभ्यते दूरेऽपि निवसन् ॥)

—Cited later by Jayaratha in *Vimarśinī*, p. 208

20) ......*Pratīpam*...... (.p 31 v. 103)

थणभुअमूलणिअंबे पिआएँ जुण्णंबराइ पेक्खंतो ।
मुसलम्मि धावताइ (?वावडाए) वहुमण्णाइ पामसो रोरं ॥
(स्तन-भुजमूल-नितम्बान् प्रियाया जीर्णाम्बरायाः प्रेक्षमाणः ।
मुसले व्यापृताया बहु मन्यते पामरो रोरम् (= दारिद्र्यम् ॥)

21) ......*Vaidharmyam*...... (p. 31 v. 106)

जाहे च्चिअ तुह चाओ ओसरिओ (?णीसरिओ) णिअ-णिओल-गब्भाहि ।
ताहे च्चिअ रिउलोओ पइट्ठओ गिरि-गुहा-गब्भं ॥
(यदैव तव चापो निःसृतो निजनिचोल-गर्भात् ।
तदैव रिपुलोकः प्रविष्टः गिरि-गुहा-गर्भम् ॥)

22) ......*Rūpakam*...... (p. 33 v. 108)

सो णत्थि एत्थ गामे जो एअं महमहंत-लाअण्णं ।
तरुणाणं हिअअलूडिं परिसक्कंतिं णिवारेइ ॥
(स नास्ति अत्र ग्रामे य एतां प्रसरल्लावण्याम् ।
तरुणानां हृदय-लुण्ठाकीं परिष्वष्कन्तीं निवारयति ॥)

—Cited earlier in *KP* X. v. 570; *GS* (*W*) 997

23) ......*Rūpakam*...... (p. 35 v. 119)

ववसाअ-रइ-पओसो रोस-गइंद-दिढ-सिंखला-पडिबंधो ।
कह कह वि दासरहिणो जअ-केसरि-पंजरो गओ घण-समओ ॥
(व्यवसाय-रवि-प्रदोषो रोष-गजेन्द्र-दृढ-शृङ्खला-प्रतिबन्धः ।
कथं कथमपि दाशरथेर्जयकेसरि पञ्जरो गतोघन-समयः ॥)

—*Setubandha* I. 14, cited earlier in *SK* IV v. 29 (p. 416)

24) ......*Rūpakam*...... (p. 36 v. 120)

माण-दुम-परुस-पवणस्स मामि सव्वंग-णिव्वुइ-अरस्स ।
अवगूहणस्स भद्दं रअ-नाडअ-पुव्वरंगस्स ॥
(मान-द्रुम-परुष-पवनस्य सखि सर्वाङ्गनिर्वृतिकरस्य ।
अवगूहनस्य भद्रं रति-नाटक-पूर्वरङ्गस्य ॥)

—*GS* IV. 44

Hemacandra lays down the rule : मामि हला हले सख्या वा ।—*Siddhahema* VIII. ii. 195
There is a variant reading ' सामि ' (स्वामिन्).

25) ......*Apahnutiḥ*...... (p. 41 v. 134)

सोहइ चल-मउलि-कुसुमो (?सुमो) भमंत-भसल-च्छलेण अप्पाणं ।
महुमहण-दंसण-विलीअमाण-दुरिअं पआसेंतो ॥
(शोभते चल-मौलि-कुसुमो (?सुमो) भ्रमन्भ्रमर-च्छलेनात्मानम् ।
मधु-मथन-दर्शन-विलीयमान-दुरितं प्रकाशयन् ॥)

26) ......*Apahnutiḥ*...... (p. 41 v. 135)

उल्लोल्ल-करअ- रअण-क्खएहिं तुह लोअणेसु मह दिण्णं ।
रत्तंसुअ- प्पसाअं कोवेण पुणो इमे ण अक्कमिआ ॥
(आर्द्रार्द्र-करज-रदन-क्षतैस्तव लोचनयो र्मम दत्तः ।
रक्तांशुक-प्रसादः कोपेन पुनरिमे नाक्रान्ते ॥)

—First cited in *KP* IV 70 (p. 144). Cf *GS* (*W*) 971.

27) ......*Apahnutiḥ*...... (p. 42 v. 136

विहलंखलं तुमं सहि दट्ठूण कुडेण तरलतर-दिट्ठिं ।
वारप्फंसमिसेण अ अप्पा गरुओ त्ति पाडिअ विभिण्णो ॥
(विह्वलाङ्गां/विशृङ्खलां त्वां सखि दृष्ट्वा कुटेन तरलतरदृष्टिम् ।
द्वार-स्पर्श-मिषेण चात्मा गुरुक इति पातयित्वा विभिन्नः ॥)

—First cited in *KP* IV. 91 *GS* (*W*) 880

28) ......*Apahnutiḥ*...... (p. 43 v. 140

जोव्वणवुड्ढी कमला लडहज्जण (विअड्ढ-जण) परिअओ पिआ रत्ता ।
णव-महु-समओ एसो सग्गो अक्खाणिआ अण्णा ॥
(यौवन-वृद्धिः कमला मनोहरजन- (?विदग्ध-जन-) परिचयः प्रिया रक्ता ।
नव-मधु-समय एष स्वर्ग आख्यानिका अन्या ॥)

29) ......*Utprekṣā*...... (p. 48 v. 153

परिरंभ-विसारि-त्थणआ भण (? मण = मणे) कामेसुपडणसंकाए ।
रइ-कलहे जा पुरओ धरेत्ति (?धरेइ) फर-फलअजुअलं व ॥
(परिरम्भ-विसारि-स्तनका (= स्तनी) कामेषु-पतन-शङ्कया ।
रति-कलहे या पुरतो धरति फर-फलक-युगलमिव ॥)

30) ......*Utprekṣā*...... (p. 50 v. 157)

बलाआ (?बलआ)-मेहनिहेणं नहम्मि निव्वाणमहिलसिआ ।
मुत्ता-कलाव-कंथा गिम्हम्मि कालवीरेण ॥
(बलाहक-मेघ-निभेन नभसि निर्वाणमभिलषिता ।
मुक्ता-कलाप-कन्था ग्रीष्मे काल-वीरेण ॥)

31) ......*Utprekṣā*...... (p. 50 v. 158)

महिला-सहस्सभरिए तुह हिअए सुहअ सा अमाअंती ।
अणुदिणमणण्णकम्मा अंगं तणुअं पि तणुएइ ॥
(महिला-सहस्र-भृते तव हृदये सुभग सा अमान्ती ।
अनुदिवसमनन्यकर्मा अङ्गं तनुकमपि तनूकरोति ॥)

—*GS* II. 82

32) ......*Bhrāntimān*...... (p. 52 v. 164)

पुसिआ कण्णाहरणेंदणीलकिरणाहआ ससिमऊहा ।
माणिणि-वअणम्मि सकज्जलंसु-संकाएँ दइएण ॥
(प्रोञ्छिताः/मृष्टाः कर्णाभरणेन्द्रनीलकिरणाहताः शशि-मयूखाः ।
मानिनीवदने सकज्जलाश्रुशङ्कया दयितेन ॥)

—*GS* IV. 2

33) ......*Ullekhaḥ*...... (p. 54 v. 168)

णाराअणो त्ति परिणअ-वआहिँ सिरि-वल्लहो त्ति तरुणीहिं ।
बालाहि उण (उणो) कोऊहलेण एमेअ सच्चविओ ॥
(नारायण इति परिणत-वयोभिः श्री-वल्लभ इति तरुणीभिः ।
बालाभिः पुनः कुतूहलेन एवमेव दृष्टः ॥)

—First cited in *Alaṁkārasarvasva*, p. 61

34) ......*Aprastuta–praśaṁsā*...... (p. 62 v. 189)

तं णत्थि किं पि पइणो पकप्पिअं जं ण णिअइघरिणीए ।
अणवरअ-गमणसीलस्स काल-पहिअस्स पाहिज्जं ॥
(तन्नास्ति किमपि पत्युः प्रकल्पितं यन्न नियति-गृहिण्या ।
अनवरत-गमनशीलस्य काल-पथिकस्य पाथेयम् ॥)

—First cited in *Alaṁkārasarvasva*, p. 133

35) ......*Vyājastutiḥ*...... (p. 64 v. 198)

परिणाम-महुर-फलभारेहिं पहिआण वारिअ-खुहेण ।
एएण खइर-रुक्खेण भूसिआ जेउ मरुभूमी ॥
(परिणाम-मधुर-फलभारैः पथिकानां वारित-क्षुधेन ।
एतेन खदिर-वृक्षेण भूषिता जयतु मरु-भूमिः ॥)

36) ......*Pratyanīkam*...... (p. 68 v. 205)

मम वल्लहेण राया णूणं जसेहिँ खलीकओ दाणिं ।
जोण्हा-णिह-दावग्गि-भरेहिँ पतावेइ मं जेण ॥
(मम वल्लभेन राजा (= चन्द्रः) नूनं यशोभिः खलीकृत इदानीम् ।
ज्योत्स्ना-निभ-दावाग्नि-भरैः प्रतापयति मां येन ॥)

37) ......*Vinoktiḥ*...... (p. 69 v. 210)

सामी पिसुण-विमुत्तो/विमुक्को मच्छर-रहिओ कवी तहा लोए ।
विसहर-सुण्णो वि णिही पाविज्जइ पुण्ण-(?पुव्व-) पुण्णेहिं ॥
(स्वामी पिशुन-विमुक्तः मत्सर-रहितः कविस्तथा लोके ।
विषधर-शून्योऽपि निधिः प्राप्यते पूर्ण-(?पूर्व-)पुण्यैः ॥)

38) ......*Sahoktiḥ*...... (p. 70 v. 213)

णवरं चलिए चंदम्मि णहपहे मसण-किरण-कंतिल्ले ।
कमल-वणाइ णिमीलंति सह रहंगाण सोक्खेहि ॥
(नवरं (= केवलं) चलिते चन्द्रे नभःपथे मसृण-किरण-कान्तिमति ।
कमल-वनानि निमीलन्ति सह रथाङ्गानां सौख्यैः ॥)

39) ......*Sahoktiḥ*...... (p. 71 v. 215)

सह दिअह-णिसाहिँ दीहरा सासदंडा
सह मणिवलएहिं बाह-धारा गलंति ।
तुह सुहअ विओए तीअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥

(सह दिवस-निशाभिर्दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
तव सुभग वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥)

—*Karpūramañjarī* II. 1

40) ......*Śleṣaḥ*...... (p. 77 v. 233)

सअ-(?सर)सोअरो वि ण समो विमलस्स मुहस्स फुडसुहासो वि ।
मम वल्लहाएँ तीए कमलं तह पुण्ण-रअणिअरो वि ॥
(सरसोदरोऽपि न समो विमलस्य मुखस्य स्फुट-सुहासोऽपि ।
मम वल्लभायास्तस्याः कमलं तथा पूर्ण-रजनिकरोऽपि ॥)

41) ......*Śleṣaḥ*...... (p. 78 v. 234)

विअड-पअ-बंध-बंधव-सिरिणा तुह मित्त-चित्त-विहवस्स ।
रण्णो वि गइ गुरुइ (? गई गरुई) (?गुरुणो)सरिसी रअणाअरेण इमा ॥
(विकट-पट-बन्ध-बान्धवश्रिया (विकटपयोबन्धबान्धवश्रिया वा) तव
मित्रचित्तविभवस्य ।
राज्ञोऽपि गतिर्गुर्वी (?गुरोः) सदृशी रत्नाकरेण (रत-नागरेण वा) एषा ॥)

42) ......*Śleṣaḥ*...... (p. 79 v. 240)

लंकालआणँ पुत्तअ वसंत-मासेक्क-लद्ध-पसराणं ।
आपीअ-लोहिआणं बीहेइ जणो पलासाणं ॥
(लङ्कालयानां पुत्रक वसन्तमासैक-लब्ध-प्रसराणाम् ।
आपीत-लोहितानां बिभेति जनः पलाशानाम् ॥)

—*GS.* IV. 11

43) ......*Ākṣepaḥ*...... (p. 84 v. 254)

दूर-पवासे सँमुहो सि सुहअ आलिंगणं खणं कुरुसु ।
अहवा अलाहि इमिणा गमणम्मि विलंबआरेण ॥
(दूर-प्रवासे सम्मुखोऽसि सुभग आलिङ्गनं क्षणं कुरुष्व ।
अथवालमेतेन गमन-विलम्बकारेण ॥)

—Later cited in *Vimarśinī*, p. 147

44) ......*Ākṣepaḥ*...... (p. 86 v. 257)

किं भणिमो भण्णइ कित्ति (?कित्तिय) अह किंवा इमेण भणिएण ।
भण्णिहिसि तह वि अहवा भणामि किंवा ण भणिओ सि ॥
(किं भणाम भण्यते कियदथ किंवैतेन भणितेन ।
भणिष्यसे तथाप्यथवा भणामि किंवा न भणितोऽसि ॥)

—Later cited in *Vimarśinī*, pp. 4–5

45) ......*Vidhyādhāsaḥ*...... (p. 87 v. 259)

वच्च मह च्चिअ एक्काए होंतु णीसास-रोइअव्वाइं ।
मा तुज्झ वि तीएँ विणा दक्खिण्ण-हअस्स जाअंतु ॥
(व्रज ममैवैकस्या भवन्तु निःश्वास-रोदितव्यानि ।
मा तवापि तया विना दाक्षिण्यहतस्य जायन्ताम् ॥)

—First cited in *DHV* (p. 73).

46) ......*Vidhyābhāsaḥ*...... (p. 87 v. 260)

जइ वच्चसि वच्च तुमं को वा वारेइ तुज्झ गमणस्स ।
तुह गमणं मह मरणं लिहिअ-पसत्तं कअंतेण ॥
(यदि व्रजसि व्रज त्वं को वा वारयति तव गमनस्य ।
तव गमनं मम मरणं लिखित-प्रसक्तं कृतान्तेन ॥)

47) ......*Vidhyābhāsaḥ*...... (p. 87 v. 262)

जाएज्ज वणुद्देसे खुज्जो वि हु णीसहो/खुज्जो च्चिअ पाअवो झडिअ-पत्तो ।
मा माणुसम्मि लोए ताई (?चाई) रसिओ/चाएक्करसो दरिद्दो अ ॥
(जायेय वनोद्देशे कुब्जोऽपि खलु निः सहः/कुब्ज एव पादपो गलित-पत्रः ।
मा मानुषे लोके त्यागी रसिको/त्यागैकरसो दरिद्रश्च ॥)

—*GS* III. 30

48) ......*Vidhyābhāsaḥ*...... (p. 88 v. 265)

सुहअ विलंबसु थोअं जाव इमं विरह-काअरं हिअअं ।
संठविऊण भणिस्सं अहवा वोलेसु किं भणिमो ॥
(सुभग विलम्बस्व स्तोकं यावदिदं विरह-कातरं हृदयम् ।
संस्थाप्य भणिष्याम्यथवा गच्छ किं भणामः ॥)

—*Alaṁkārasarvasva* p. 147

49) ......*Sandehābhāsaḥ*...... (p. 89, v. 267)

वल्लहदढोवगूहण-सुहारसो-किं व माण-विस-जाला ।
कर-अल-धरिअ-कवोले भण सुंदरि किं प्पिअं तुज्झ ॥
(वल्लभ-दृढोपगूहन-सुधारसः किं वा मान-विषज्वाला ।
करतलधृतकपोले भण सुन्दरि किं प्रियं तव ॥)

50) ......*Vikalpābhāsaḥ*...... (p. 90, v. 269)

एसो वसंत-मासो अह वरई-सोअ-सल्ल-सव्वस्सं ।
हंहो जुवाण तं धणरसिल्ल वा वच्च इह व (?वा वच्च वा) चिट्ठ ॥
(एषो वसन्तमासोऽथ वराकी-शोक-शल्य-सर्वस्वम् ।
हंहो (= हे) युवन् त्वं धनरसिक वा व्रज वा तिष्ठ ॥)

51) ......*Vibhāvanā*...... (p. 94, v. 281)

ण अ रूवं ण अ रिद्धी णावि कुलं ण अ गुणा ण विण्णाणं ।
एमेव तह वि कस्स वि को वि अणो वल्लहो होइ ॥
(न च रूपं न च ऋद्धिः नापि कुलं न च गुणा न विज्ञानम् ।
एवमेव तथापि कस्यापि कोऽपि जनो वल्लभो भवति ॥)

—Later cited in *Vimarśinī*, p. 159

52) ......*Viśeṣoktiḥ*...... (p. 96, v. 287)

जो जस्स विहवसारो सो तं देइ त्ति किं थ अच्छेरं ।
अणहोंतं पि खु दिण्णं दोहग्गं तइ सवत्तीणं ।।
(यो यस्य विभवसारः स तं ददातीति किमत्राश्चर्यम् ।
अभवदपि खलु दत्तं दौर्भाग्यं त्वया सपत्नीनाम् (= सपत्नीभ्यः)।।)

—*GS* III. 12

53) ......*Asaṁgatiḥ*...... (p. 96, v. 289)

उअ जलहर-मालाए जत्थ च्चिअ गज्जिउग्गमो जाओ ।
तत्थ च्चिअ उल्लसिअं विज्जुम्मणिआ-सलाआहिं ।।
(पश्य जलधरमालाया यत्रैव गर्जितोद्‍गमो जातः ।
तत्रैव उल्लसितं विद्युन्मणिशलाकाभिः ।।)

54) ......*Asaṁgatiḥ*...... (p. 97, v. 291)

दलिआरि-वसा-सोणिअ-पिच्छिल-धारा-पहम्मि तुह खग्गे ।
अच्छरिअं समसमओ गमागमो कित्ति-लच्छीए ।।
(दलितारि-वसा-शोणित-पिच्छिल-धारापथे तव खड्‍गे ।
आश्चर्यं समसमयो गमागमः कीर्तिलक्ष्म्याः ।।)

55) ......*Anyonyam*...... (p. 98, v. 297)

पुढुमिल्लं कारणं अधर/अहर-खंडणेणोल्लसेंति सिक्कारा ।
सिक्कारेहिं अह अधर/अहर-खंडणं सामलंगीणं ।।
(प्राथमिकं/प्रथमं कारणम् अधर-खण्डनेनोल्लसन्ति सीत्काराः ।
सीत्कारेभ्यः (? सीत्कारैः) अथाधर-खण्डनं श्यामलाङ्गीनाम् ।।)

56) ......*Anyonyam*...... (p. 99, v. 299)

मअ-वस-मंथर-भमरेहिं को विणा करिवरेहिं विंझगिरी ।
विंझेण विणा करिणो पाविज्जंति हु परीहव-सआणि ।।
(मद-वश-मन्थर-भ्रमरैः को विना करिवरैः विन्ध्यगिरीः ।
विन्ध्येन विना करिणः प्राप्नुवन्ति खलु परिभव-शतानि ।।)

57) ......*Anyonyam*...... (p. 99, v. 302)

सेवअ-जणस्स किं सामिणा स-माणुण्णइं हरआ ।
सामिणो वि विसोढ-माणभंग-लहुएण किं तेण ।।
(सेवक-जनस्य किं स्वामिना स्व-मानोन्नतिं हरता ।
स्वामिनोऽपि विसोढ-मानभङ्ग-लघुकेन किं तेन ।।)

58) ......*Viparyayaḥ*...... (p. 101, v. 310)

अंगाइ पतणुआइं किमवि किमवि गरइ (?अंगाइँ पअणुआइं वि किंपि गरुएइ)
महु-मअ-विलासो।
हिआआइं लहूइं करेइ (? हिअआइँ पुणो लहुएइ) माण-गरुआणि (गरुआइँ)
वि पिआणं ॥
(अङ्गानि प्रतनुकान्यपि किमपि गुरूकरोति मधु-मद-विलासः।
हृदयानि पुनर्लघयति मानगुरुण्यपि प्रियाणाम् ॥)

—*Gauḍavaho*. 1148

59) .....*Acintyam*...... (p. 103, v. 315)

चिर-संठिओ वि विगलइ माणो चिर-विगलिओ वि संघडइ।
विवरीअ-रसं खु करेइ महुमओ कामिणिजणम्मि ॥
(चिर-संस्थितोऽपि विगलति मानश्चिरविगलितोऽपि सङ्घटते।
विपरीत-रसं करोति मधुमदः कामिनी-जने ॥)

60) ......*Acintyam*...... (p. 103, v. 317)

अच्चासण्णो ओही कीरउ मह मंडणं पअत्तेण।
अज्ज समप्पइ विरहो एंते वि पिए ण एंते वि ॥
(अत्यासन्नोऽवधिः क्रियतां मम मण्डनं प्रयत्नेन।
अद्य समाप्यते विरह आयत्यपि प्रिये नायति अपि ॥)

61) ......*Acintyam*...... (p. 104, v. 319)

जो रणमुहम्मि रण्णा णिज्जिअ मुत्तो/मुक्को हओ अ रिउवग्गो।
धम्मो पुव्वेण कओ अण्णेणेसो जसो विमलो ॥
(यो रणमुखे राज्ञा निर्जित्य मुक्तो हतश्च रिपुवर्गः।
धर्मः पूर्वेण कृतोऽन्येनैतद् यशो विमलम् ॥)

62) ......*Viṣmam*...... (p. 105, v. 323)

उन्नामेंति दइच्चा जह जह दप्पुद्धुरं मुहं एए।
तह तह मज्झ वि लज्जाइ होइ दूराणअं वअणं ॥
(उन्नमयन्ति दैत्या यथा यथा दर्पोध्दुरं मुखमेते।
तथा तथा ममापि लज्जया भवति दूरानतं वदनम् ॥)

63) ......*Viṣamam*...... (p. 106, v. 324)

रवि-मंडलम्मि पाआल-पंक-लेसेहि लंछणासंगो।
जेहि कओ ताण णमो आइ-वराहस्स सासाणं ॥
(रवि-मण्डले पाताल-पङ्कलेशैर्लाञ्छनासङ्गः।
यैः कृतस्तेभ्यो नम आदि-वराहस्य श्वासेभ्यः ॥)

64) ......*Viṣamam*...... (p. 107, v. 329)

जह गहिरो (? गंभीरो) जह रअण-णिब्भरो जह अ णिम्मल-च्छाओ ।
तत् (? तथा) किं विधिनैष सरस-पानीयो (वाणीको) जलनिधिर्न कृतः ।।
(यथा गंभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः ।
तत् (? तथा) किं विधिनैष सरस-पानीयो (वाणीको) जलनिधिर्न कृतः ।।)

—First cited in *KP* X. 573 (p. 760)

65) ......*Samam*...... (p. 108, v. 332)

मुहपेच्छआण मुहपेच्छओ सि सिहिलाण सिहिल-सब्भावो ।
थणआअत्तं पेम्म सुहअ ता कस्स कुप्पामो ।।
(मुख-प्रेक्षकाणां मुख-प्रेक्षकोऽसि शिथिलानां शिथिल-सद्भावः ।
स्तनायत्तं प्रेम सुभग तत् कस्मै कुप्यामः ।।)

66) ......*Samam*...... (p. 108, p. 333)

लच्छी दुहिआ जामाउओ हरी तह घरिल्लिआ गंगा ।
अमअ-मअंका अ सुआ अहो कुडुंबं महोदहिणो ।।
(लक्ष्मीर्दुहिता जामातृको हरिस्तथा गृहिणी गङ्गा ।
अमृत-मृगाङ्कौ च सुतौ अहो कुटुम्बं महोदधेः ।।)

—First cited in *DHV* III. pp. 463-464

67) ......*Samam*...... (p. 108, v. 334)

उप्पाइअ-दव्वाणँ वि खलाणँ को भाअणं खलो च्चेअ ।
पक्काइँ वि णिंबफलाइँ णवरँ काएहिँ खज्जंति ।।
(उत्पादित-द्रव्याणामपि खलानां को भाजनं खल एव ।
पक्वान्यपि निम्बफलानि केवलं काकैः खाद्यन्ते ।।)

—*GS* III. 48

68) ......*Vicitram*...... (p. 110, v. 339)

पिअअं पडि वलइ मणो ओसरइ विगलई लज्जा ।
परिमलमेत्तेण च्चिअ मइराए एत्थ किं भणिमो ।।
(प्रियं प्रति वलति मनो मानोऽपसरति विगलति लज्जा ।
परिमलमात्रेणैव मदिराया इह किं भणामः ।।)

69) ......*Vicitram*...... (p. 110, v. 341)

रिउणो संपत्तिसमूसुएहि वीरेहि आकमिज्जंतु ।
अक्कमिअ जलहरं पुण सीह तुमं किमिव पाविहिसि ॥
(रिपवः संपत्ति-समुत्सुकैः वीरैराक्रम्यन्ताम् ।
आक्रम्य जलधरं पुनः सिंह त्वं किमिव प्राप्स्यसि ॥)

70) ......*Vicitram*...... (p. 111, v. 342)

फग्गुच्छव/फग्गुच्छण-णिद्दोसं केणवि कद्दम-पसाहणं दिण्णं ।
थण-कलस-मुह-पलोट्टंत-सेअ-धोअं किणो धुअसि ॥
(फाल्गुनोत्सव-निर्दोषं केनापि कर्दमप्रसाधनं दत्तम् ।
स्तन-कलश-मुखप्रलुठत्स्वेद-धौतं किमिति धावयसि ॥)

—*GS* IV. 69

The *GS* reaps ' फग्गुच्छण '.

71) ......*Viśeṣaḥ*...... (p. 112, v. 347)

चोरिअ-रमणाउलिए पुत्ति पिअं हरिहिसि त्ति किं चुज्जं ।
वच्चंती मुह-जोण्हा-भरेहि तिमिरं पि णुल्लिहिसि ॥
(चौर्यरमणा (= रता) कुलिते पुत्रि प्रियं हरिष्यसीति किमाश्चर्यम् ।
व्रजन्ती मुख-ज्योत्स्नाभरैस्तिमिरमपि नोत्स्यसि ॥)

—Later cited i*n Vimarśinī* p. 173

72) ......*Viśeṣaḥ*...... (p. 112, v. 348)

आलिहमाणीओ वि चित्तवत्तिआ किं पि किं पि तद्दिअहं ।
ण हु णवरं तणुआयंति ताउ वड्ढंति लोअस्स ॥
(आलिख्यमाना अपि चित्रवर्तिकाः (चित्तवृत्तयः) किमपि किमपि तद्दिवसम् ।
न खलु केवलं तनुकायन्ते ता वर्धन्ते लोकस्य ॥)

73) ......*Vyāghātaḥ*...... (p. 113, v. 351)

विण्णाणेण मअ-विसं विणिवट्टइ भिण्ण-कारणुप्पण्णं ।
विण्णाणकारणं जं तं पुण भण को णिवट्टेइ ॥
(विज्ञानेन मदविषं विनिवर्तते भिन्नकारणोत्पन्नम् ।
विज्ञान-कारणं यत्तत्पुनर्भण को निवर्तयति ॥)

—Later cited in *Vimarśinī* 174

74) ......*Aśakyam*...... (p. 115, v. 355)

This *gāthā* is the same as given above under S. No. 72.

75) ......*Aśakyam*...... (p. 115, v. 357)

उज्जुअ-रए ण तूसइ वक्कम्मि वि आअमं विकप्पेइ ।
एत्थ अहव्वाएँ मए पिए पिअं कहँ णु काअव्वं ।।
(ऋजुक-रते न तुष्यति वक्रेऽप्यागमं विकल्पयति ।
इहाभव्यया मया प्रिये प्रियं कथं नु कर्तव्यम् ।।)

—*GS* V. 76

76) ......*Vyatyāsaḥ*...... (p. 116, v. 358)

सच्चिअ/सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ ।
मरउ ण तुमं भणिस्सं मरणं पि सलाहणिज्जं से ।।
(सैव/सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः ।
म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयं तस्याः ।।)

—*GS* I. 12

77) ......*Vyatyāsaḥ*...... (p. 117, v. 362)

सुकअं चिअ परिभोगाण कारणं सुहअ ते वि मोहस्स ।
मोहो पावाण परंपराएँ सुअअं चिअ विरुद्धं ।।
(सुकृतमेव परिभोगानां कारणं सुभग तेऽपि मोहस्य ।
मोहः पापानां परम्परया सुकृतमेव विरुद्धम् ।।)

78) ......*Samatā*...... (p. 118, v. 366)

कुविआएँ पाअ-पडणेण जो पसाओज्जिओ (?पसाओ अज्जिअओ) तुमए ।
रे मूढ सअं चिअ सो हारिअओ गोत्त-खलणेण ।।
(कुपितायाः पादपतनेन यः प्रसादोऽर्जितस्त्वया ।
रे मूढ स्वयमेव स हारितो गोत्र-खलनेन ।।)

79) ......*Udrekaḥ*...... (p. 120, v. 372)

उग्गच्छउ दिणणाहोऽत्थमेउ ससि किं अम्ह (? म्ह) छिण्णमेएण ।
एअं पुण मह दुक्खं जं पत्ता पंकजेहिँ सिरी ।।
(उद्गच्छतु दिननाथोऽस्तमेतु शशी किमस्माकं छिन्नमेतेन ।
एतत्पुनर्मम दुःखं यत् प्राप्ता पङ्कजैः श्रीः ।।)

80) ......*Tulyam*...... (p. 120, v. 374)

अग्घंतु सिसिर-समए कामीण घणावरुंडण-महल्ली (? सुहेल्ली)।
जलकेली पुण पअड-त्थण-जहणो सो गओ च्चेव ॥
(अर्घन्तु (? राजन्तु) शिशिर-समये कामिनां घनालिङ्गन-सुखकेलयः।
जलकेलिः पुनः प्रकट-स्तन-जघनः स गत एव ॥)

81) ......*Anādaraḥ*...... (p. 122, v. 377)

मअणाहिसामलेण इअ गणिअ (? गणिए/गणिअं) किं मुहं णलाडेण।
इच्छामि इमं तिणअण-प्पणाम-किण-कालअं वोढुं ॥
(मृगनाभिश्यामलेनेति गणिते/गणितं (= विचारिते/विचारितं) किं मुखं ललाटेन।
इच्छामीदं त्रिनयन-प्रणाम-किण-कलुषितं वोढुम् ॥)

82) ......*Ādaraḥ*...... (p. 122, v. 378)

संपत्तिआ वि खज्जइ पण्णच्छेएसु पुत्ति को दोसो।
णिअ-पइणा वि रमिज्जइ पर-पुरिस-विवज्जिए गामे ॥
(संपत्तिकापि खाद्यते पर्णच्छेदेषु पुत्रि को दोषः।
निज-पतिनापि रम्यते पर-पुरुष-विवर्जिते ग्रामे ॥)

83) ......*Anukṛtiḥ*...... (p. 124, v. 386)

जं चेअ मउलणं लोअणाण रइ-रस-वसेण णिम्माअं।
अणुबद्धं तं चिअ कामिणीण णिद्दाणुबंधेण ॥
(यदेव मुकुलनं लोचनानां रति-रस-वशेन निर्मितम्।
अनुबद्धं तदेव कामिनीनां निद्रानुबन्धेन ॥)

The first and the third quarters are quoted by Hemacandra in his Prakrit Grammar (under sūtra 8.2.184).

84) ......*Pratyuāhaḥ*...... (p. 125, v. 388)

दाहपसंगो अलिआणलेण पत्तो हरस्स ससिणो जो।
सुरसरिसलिलभरेणं सोमिअ सो विहडिओ झत्ति ॥
(दाहप्रसङ्गोऽलिकानलेन प्राप्तो हरस्य शशिनो यः।
सुर-सरित्सलिलभरेण सौम्य स विघटितो झटिति ॥)

85) ......*Pratyādeśaḥ*...... (p. 127, v. 392)

अंगाइ पतणुआइ (? अंगाइँ पअणुआइं) (Sk : अङ्गानि प्रतनुकानि) etc.

This *gāthā* is identical with the *gāthā* given above under S. No. 58.

86) ......*Pratyādeśaḥ*...... (p. 127, v. 393)

उच्चअरं दोलंतीएँ तुज्झ मण्णे णहप्पहा-दुमिओ ।
अइरेण सुअणु होहिइ पच्छाइअलंछणो चंदो ।।
(उच्चतरं दोलन्त्यास्तव मन्ये नखप्रभा-धवलितः ।
अचिरेण सुतनु भविष्यति प्रच्छादित-लाञ्छनश्चन्द्रः ।।)

87) ......*Pratyādeśaḥ*...... (p. 127, v. 394)

एगे कुणंति छिद्दं पअइ-विसुद्धे वि णिम्मले रअणे ।
अण्णे महाणुहावा गुणेहिं तं चेअ पूरेंति ।।
(एके कुर्वन्ति छिद्रं प्रकृति-विशुद्धेऽपि निर्मले रत्ने ।
अन्ये महानुभावा गुणैस्तदेव पूरयन्ति ।।)

88) ......*Pratyādeśaḥ*...... (p. 127, v. 395)

कुविअ वि(?कुविआण)परम्मुहाणं थोवं पसिआण(?थोवंतरिआण)–
मेगसअणम्मि ।
पूरिज्जइ रोमंचोग्गमेण दोण्हि पि ओआसो ।।
(कुपितयोः पराङमुखयोः स्तोकमन्तरितयोरेकशयने ।
पूर्यते रोमाञ्चोद्गमेन द्वयोरप्यवकाशः ।।)

89) ......*Samādhiḥ*...... (p. 128, v. 398)

सोवाणारोहण-परिसमेण काए वि जे विणिस्सरिआ ।
ते च्चिअ हरिदंसणवइअरेण सासा ण विच्छिण्णा ।।
(सोपानारोहण-परिश्रमेण कस्या अपि ये विनिःसृताः ।
त एव हरि-दर्शन- व्यतिकरेण श्वासा न विच्छिन्नाः ।।)

—Later cited in *Vimarśinī*, p. 203

90) *Samādhiḥ*...... (p. 129, v. 399)

हिंदोलणोच्छवे सुंदरीण जे सेअ-बिंदुणो पडिआ ।
वेग-तुडिएण हारेण ताण माहप्पमुच्छलिअं ।।
(हिन्दोलनोत्सवे सुन्दरीणां ये स्वेदबिन्दवः पतिताः ।
वेगत्रुटितेन हारेण तेषां माहात्म्यमुच्छलितम् ।।)

91) ......*Arthāntaranyāsaḥ*...... (p. 130, v. 403)

सरलाण पअइ-कढिणा मज्झं लद्धूण किंव ण कुणंति ।
जं थणएहि भुआणं अण्णोण्ण-विलोअणं पिहिअं ॥
(सरलानां प्रकृति-कठिना मध्यं लब्ध्वा किमिव न कुर्वन्ति ।
यत् स्तनाभ्यां भुजानामन्योन्यविलोकनं पिहितम् ॥)

92) ......*Arthāntaranyāsaḥ*...... (p. 131, v. 405)

जेण परक्कमणिहिणा अक्कमिओ सत्त-साअरुद्देसो ।
ण हु काअराण ढुक्कइ ओआसो णिअ(अ)घरेसु वि ॥
(येन पराक्रमनिधिना आक्रान्तः सप्त-सागरोद्देशः ।
न खलु कातराणां ढौकतेऽवकाशो निज(क)गृहेष्वपि ॥)

93) ......*Arthāntaranyāsaḥ*...... (p. 131, v. 408)

णिद्दोसो ण हु कोइ वि ण हु कोइ वि सव्वहा गुणविमुक्को ।
खीरसमुद्दे वि विसं रअणाणि वि विसहर-सिरेसु ॥
(निर्दोषो न खलु कोऽपि न खलु कोऽपि सर्वथा गुणविमुक्तः ।
क्षीर-समुद्रेऽपि विषं रत्नान्यपि विषधरशिरःसु ॥)

94) ......*Vyāptiḥ*...... (p. 133, v. 413)

ठाऊण जइ णिरिक्खइ ता से पुरओ णरिंदओ चलिओ ।
जइ धावइ ता वरई थण-जहण-कअत्थिआ खलइ ॥
(स्थित्वा यदि निरीक्षते तदस्याः पुरतो नरेन्द्रश्चलितः ।
यदि धावति तद्वराकी स्तन-जघन-कदर्थिता स्खलति ॥)

95) ......*Anumānam*...... (p. 134, v. 418)

वण्णवसिए विअत्थसि सच्चं चिअ सो तुए ण संभविओ(?सच्चविओ ।
ण हु होंति तम्मि दिट्ठे सुत्था/सत्थावत्थाइँ अंगाइं ॥
(वर्णवशिते विकत्थसे सत्यमेव स त्वया न संभावितः(?दृष्टः) ।
न खलु भवन्ति तस्मिन्दृष्टे सुस्था/स्वस्थावस्थान्यङ्गानि ॥)

—*GS* V. 78

Bhuvanapāla renders the term '*Vaṇṇa–vasie*' into Sanskrit as '*Svadeśa–vāṣinī*' and adds at the end of his comments "*Vaṇṇavasiyā svadeśavāsinī*".

96) ......*Hetuḥ*...... (p. 136, v. 424)

संजीवणोसहिं पिव सुअस्स रक्खइ अणण्ण-वावारा ।
सासू णवब्भ-दंसण-कंठागअ-जीविअं सुण्हं ॥
(सञ्जीवनौषधिमिव सुतस्य रक्षत्यनन्यव्यापारा ।
श्वश्रूर्नवाभ्रदर्शन-कण्ठागत-जीवितां स्नुषाम् ॥)

—*GS* IV. 36

Bhuvanapāla reads ' *ṇosaham* ' (Sk : ' *nauṣadham* '.)

97) ......*Hetuḥ*...... (p. 137, v. 428)

हरिहिइ पिअस्स णव-चूअ-पल्लवो पढम-मंजरि-सणाहो ।
मा रुवसु पुत्ति पत्थाण-कलस-मुह-संठिओ गमणं ॥
(हरिष्यति प्रियस्य नवचूत-पल्लवः प्रथम-मञ्जरी-सनाथः ।
मा रोदीः पुत्रि प्रस्थान-कलश-मुख-संस्थितो गमनम् ॥)

—*GS* II. 43

98) ......*Apattiḥ* (p. 138, v. 430)

मा होहि तरुणि दइए चिरेण आओ त्ति माणमंथरिआ ।
अण्णह सो विरहग्गिम्मि गओ वि तहा गओ चेव ॥
(मा भव तरुणि दयिते चिरेणागत इति मान-मन्थरिता ।
अन्यथा स विरहाग्नौ गतोऽपि तथा गत एव ॥)

99) ......*Arthāpattiḥ*...... (p. 140, v. 433)

संणिहिअ-भुजंगाओ वि चंदण-लइआओ जो थरथरेइ ।
कह सो विओइणीणं कुणइ ण मलयाणिलो कंपं ॥
(संनिहितभुजङ्गा अपि चन्दन-लतिका यः कम्पयति ।
कथं स वियोगिनीनां करोति न मलयानिलः कम्पम् ॥)

100) ......*Arthāpattiḥ*...... (p. 140, v. 435)

दक्खिण्णेण वि एंतो सुहअ सुहावेसि अम्ह हिअआइं ।
णिक्कइअवाणुरत्तो सि जाण का णिव्वुदी ताणं ॥
(दाक्षिण्येनाप्यायन् सुभग सुखयस्यस्माकं हृदयानि ।
निष्कैतवानुरक्तोऽसि यासां का निर्वृतिस्तासाम् ॥)

—*GS* I. 85

101) ......*Arthāpattiḥ*...... (p. 141, v. 437)

एक्को वि काल/कण्ह-सारो ण देइ गंतुं पआहिण-वलंतो/चलंतो ।
किं उण बाहाउलिअं लोअण-जुअलं पिअअमाए ।।
(एकोऽपि काल/कृष्ण-सारो न ददाति गन्तुं प्रदक्षिणं वलन्/चलन् ।
किं पुनर्बाष्पाकुलितं लोचन-युगलं प्रियतमायाः ।।)

—*GS* I. 25

102) ......*Arthāpattiḥ*...... (p. 141, v. 438)

लुंबीओ अंगण-माहवीणँ दारग्गलाउ जाआउ ।
आसासो पंथ-पलोअणे वि नट्ठो गअवईणं ।।
(स्तबका (लता) अङ्गण-माधवीनां द्वारार्गला जाताः ।
आश्वासो पान्थ-प्रलोकने (मार्गान्वेषणे) ऽपि नष्टो गतपतिकानाम् ।।)

—*GS* IV. 22

103) ......*Vidhiḥ*...... (p. 143, v. 441)

गज्ज महं चिअ (? महच्चिअ) उवरिं सव्वत्थामेण लोहहिअअस्स ।
जलहर लंबालइअं मा रे मारेहिसि वराइं ।।
(गर्ज ममैवोपरि सर्वस्थाम्ना लोह-हृदयस्य ।
जलधर लम्बालकिकां (= लम्बालकां) मा रे मारयिष्यसि वराकीम् ।।)

—*GS* VI. 66

104) ......(*Vidhyābhāsa-Sankīrṇa*) *Vidhiḥ*...... (p. 143, v. 442)

गज्जसु जलअ जहिच्छं तुमंपि विप्फुरसु विज्जुले अहिअं ।
ण हु फुडइ वज्ज-घडिअं कढिणं अम्हाण हअ-हिअअं ।।
(गर्ज जलद यथेच्छं त्वमपि विस्फुर विद्युदधिकम् ।
न खलु स्फुटति वज्र-घटितं कठिनमस्माकं हत-हृदयम् ।।)

105) ......*Niyamaḥ*...... (p. 144, v. 446)

का विसमा देव्वगई किं दुलहं जं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ।।
(का विषमा? दैवगतिः किं दुर्लभम्? यज्जनो गुणग्राही ।
किं सौख्यं? सुकलत्रम् किं दुःखम्? यत् खलो लोकः ।।)

—First cited in *KP* X. v. 529 (p. 710)

106) ......*Niyamaḥ (?)*...... (p. 144, v. 447)

वाणिअअ हत्थिदंता कुत्तो अम्हाण वग्घकित्ती अ ।
जाव लुलिआलअ-मुही घरम्मि परिसक्कए सोण्हा ।।
(वाणिजक (= वणिक्) हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।
यावल्लुलितालकमुखी गृहे परिष्वष्कते स्नुषा ।।)

—First cited in *DHV* III. p. 299

107) ......*Niyamaḥ (?)*...... (p. 145, v. 448)

पसिअ पिए का कुविआ? सुअणु तुमं परअणम्मि को कोवो? ।
को हु परो? णाह तुमं कीस? अपुण्णाण मे सत्ती ।।
(प्रसीद प्रिये का कुपिता? सुतनु त्वम् परजने कः कोपः ।
कः खलु परो? नाथ त्वम् कस्मात् (किमिति)? अपुण्यानां मे शक्तिः ।।)

—*GS* IV. 84

108) ......*Niyamaḥ*...... (p. 145, v. 449)

अत्ता एत्थ णुमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअंधअ सेज्जाए महं णुमज्जिहिसि ।।
(श्वश्रूरत्र निमज्जति (= शेते) अत्राहं दिवसकं प्रलोकस्व ।
मा पथिक रात्र्यन्धक शय्यायामावयोर्निमङक्ष्यसि ।।)

—Cf. *GS* VIII. 67

109) ......*Parisaṁkhyā*...... (p. 146, v. 451)

विसमासु समरसीमासु जेण चाइक्करसिअ-हिअएण ।
हत्थो पसारिओ णं णवरं करवाल-गहणम्मि ।।
(विषमासु समरसीमासु येन त्यागैकरसिक-हृदयेन ।
हस्तः प्रसारितो नूनं केवलं करवाल-ग्रहणे ।।)

110) ......*Parisaṁkhyā*...... (p. 146, v. 453)

अण्णत्थ कुणसु जोण्हं मा चंद समुद्द-वरिसओ होहि ।
उज्जोइअं घरं णो दइआ-मुह-चंद-कंतीए ।।
(अन्यत्र कुरुष्व ज्जोत्स्नां मा चन्द्र समुद्र-वर्षको भव ।
उद्योतितं गृहमस्माकं दयिता-मुख-चन्द्र-कान्त्या ।।)

111) ......*Pratiprasavaḥ*...... (p. 148, v. 458)

जणणीएँ दुद्ध-धवला चंदण-धवला पुणो वि तरुणीणं ।
चिंतेंताण (? चिंतेंतस्स) समप्पइ कालो थणए जेव्व (? च्चिअ) जणस्स ॥
(जनन्या दुग्ध-धवलौ चन्दन-धवलौ पुनरपि तरुणीनाम् ।
चिन्तयत समाप्यते कालः स्तनावेव जनस्य ॥)

112) ......*Tantram*...... (p. 149, v. 461)

तुह सेण्ण-भिण्ण-पाआर-भरिअ-परिहा-समीकए भमइ ।
तिदसेंद-णअरि-भाए अपरिक्खलिआ सुहं कित्ती ॥
(तव सैन्य-भिन्न-प्राकार-भरित-परिखा-समीकृते भ्रमति ।
त्रिदशेन्द्र-नगरी-भागे अपरिस्खलिता सुखं कीर्तिः ॥)

113) ......*Tantram*...... (p. 149, v. 462)

आणंदणं मह लोअणाणं सुह-निव्वुई वि हिअअस्स ।
अंगाण अमअ-वरिसो होहिइ मह वल्लहे दिट्ठे ॥
(आनन्दनं मम लोचनयोः सुखनिर्वृतिरपि हृदयस्य ।
अङ्गानाममृतवर्षो भविष्यति मम वल्लभे दृष्टे ॥)

114) ......*Tantram*...... (p. 149, v. 463)

अद्धच्छि-पेच्छिअं मा करेहि साहाविअं पलोएहि ।
सो वि सुदिट्ठो होहिइ तुमं पि मुद्धा कलिज्जिहिसि ॥
(अर्धाक्षि-प्रेक्षितं मा कुरु/कार्षीः स्वाभाविकं प्रलोकय ।
सोऽपि सुदृष्टो भविष्यति त्वमपि मुग्धा कलिष्यसे (= ज्ञास्यसे) ॥)
—*GS* III. 25

115) ......*Tantram*...... (p. 149, v. 464)

णह-माण (? क्खअ)-कअग्गह-ताडणेहि अहरावपीडणेण अ ।
रोसो रअं च रइअं समं-पि (? ति) संकेज्ज कुविआए ॥
(नख-मान (? क्षत)-कचग्रह-ताडनैरधरावपीडनेन च ।
रोषो रतं च रचितं सममपि (? सममिति) शङ्केत कुपितया ॥)

116) ......*Vikalpaḥ*...... (p. 152, v. 470)

पिअसहि दोवि उवाआ मअणाणल-ताविअस्स हिअअस्स ।
दइअंगसंगमो वा मच्चू वा कंखिआसण्णो ॥
(प्रियसखि द्वावुपायौ मदनानलतापितस्य हृदयस्य ।
दयिताङ्ग-सङ्गमो वा मृत्युर्वा काङ्क्षितासन्नः ॥)

117) ......*Vikalpaḥ*...... (p. 153, v. 473)

विप्फुरिअ-वअण(?रअण-)-सोहं विलास-पीअंवरं सवणमालं ।
पणमह महुमहणं वा अहरं वा कुवलअच्छीणं ॥
(विस्फुरित-वदन-(?रत्न-/रदन-)शोभं विलास-पीताम्बरं(विलासपीतं वरं वा) स-वनमालम्(सव्रणमालं वा)।
प्रणमत मधु-मथनं वाऽधरं वा कुवलयाक्षीणाम् ॥)

118) ......*Samuccayaḥ*...... (p. 153, v. 475)

दइअम्मि दिट्ठ-मेत्ते विमलं रत्तं च माणसं होइ ।
पाअपडिए वि तम्मि अच्छरिअं वज्ज-कढिणा सि ॥
(दयिते दृष्टमात्रे विमलं रक्तं च मानसं भवति ।
पाद-पतितेऽपि तस्मिन्नाश्चर्यं वज्र-कठिनासि ॥)

119) ......*Samuccayaḥ*...... (p. 154, v. 480)

बहु-वल्लहस्स जा होइ वल्लहा कह वि पंच दिअहाइं ।
सा किं छट्ठं मग्गइ कत्तो मिट्ठं च बहुअं च ॥
(बहु-वल्लभस्य या भवति वल्लभा कथमपि पञ्च दिवसान् ।
सा किं षष्ठं मृगयते/मार्गयते कुतो मिष्टं च बहुकं(= बहु)च ॥)

—*GS* I. 72

120) ......*Parivṛttiḥ*...... (p. 156, v. 483)

बहु-विविह-कणअ-रअण-प्पहाण-दाणेहिँ तुज्झ सव्वेहिं ।
चज्जा(?तुच्छा)अहिलस्सइ णरवरेहि पहुचलण-धूली सा ॥
(बहु-विविध-कनक-रत्न-प्रधान-दानैस्तव सर्वैः ।
त्याज्या(?तुच्छा)अभिलष्यते नरवरैः प्रभो चरणधूलिः सा ॥)

121) ......*Parivṛttiḥ*...... (p. 156, v. 485)

जह जह मअस्स हरणं कुणइ अली मामि वारणेंदस्स ।
एअस्स सो वि तह तह कण्णाघाअं समप्पेइ ॥
(यथा यथा मदस्य हरणं करोत्यलिः सखे/मातः वारणेन्द्रस्य ।
एतस्य सोऽपि तथा तथा कर्णाघातं समर्पयति ॥)

122) ......*Paryāyaḥ*...... (p. 157, v. 488)

तीअ मुहाहि तुह मुहँ तुज्झ मुहाओ अ मज्झ चलणम्मि ।
हत्थाहत्थीअ गओ अइदुक्करआरओ तिलओ ॥
(तस्या मुखात्तव मुखं तव मुखाच्च मम चरणे ।
हस्ताहस्तिकया गतोऽतिदुष्करकारकस्तिलकः ॥)

—*GS* II. 79

123) ......*Paryāyaḥ*...... (p. 158, v. 489)

दीवाओ अरुणं सिअं सररुहं चंदाओ नीलोप्पलं
अच्छीसु तरुणीण पंकअवणं नक्खत्तलक्खादवि ।
सामाए दिअहं चकोरविसराच्चक्काणि चक्काणअं
लच्छी पेच्छसु णाह जाइ पढमं पत्ते पभाए इओ ।।

123 a) मोत्तूण तस्स रअणाअरस्स उस्संगमहह हरिणंक ।
सुण्णम्मि गअणमग्गे जीरसि णवरं परिभमंतो ।।
(दीपादरुणं सितं सरोरुहं चन्द्रान्नीलोत्पलं
अक्षिषु तरुणीनां पङ्कजवनं नक्षत्रलक्षादपि ।
श्यामाया दिवसं चकोरविसराच्चक्राणि चक्राणाम्
लक्ष्मीः प्रेक्षस्व नाथ याति प्रथमं प्राप्ते प्रभाते इतः ।।)

(मुक्त्वा तस्य रत्नाकरस्योत्सङ्गमहह हरिणाङ्क ।
शून्ये गगनमार्गे जीर्यसि नवरं/केवलं परिभ्रमन् ।।)

124) ......*Avarohaḥ*...... (p. 164, 510)

तवणाहि ससी ससिणो जलणो जलणाहि दीवओ लहुओ ।
तत्तो वि तुमं खज्जोअ तह वि रे हंत विप्फुरसि ।।
(तपनाच्छशी शशिनो ज्वलनो ज्वलनाद्दीपो लघुकः ।
ततोऽपि त्वं खद्योत तथापि रे हन्त विस्फुरसि ।।)

125) ......*Atiśayaḥ*...... (p. 164, v. 513)

जइ देवअं पसण्णं (?देव्व तं पसण्णो) मा मह कारेहि माणुसे जम्मं ।
अह जम्मं मा पेम्मं अह पेम्मं मा जणे दुलहे ।।
(यदि दैव त्वं प्रसन्नो मा मम कार्षीर्मानुषे जन्म ।
अथ जन्म मा प्रेमाथ प्रेम मा जने दुर्लभे ।।)

—Cf. *GS (W)* 844

126) ......*Atiśayaḥ* ..... (p. 165, v. 514)

सुअणो ण कुप्पइ च्चिअ अह कुप्पइ विप्पिअं ण चिंतेइ ।
अह चिंतेइ ण जंपइ अह जंपइ लज्जिओ होइ ।।
(सुजनो न कुप्यत्येव अथ कुप्यति विप्रियं न चिन्तयति।
अथ चिन्तयति न जल्पति अथ जल्पति लज्जितो भवति ।।)

—*GS* III. 50

127) ......*Atiśayaḥ*...... (p. 165, v. 516)

दुक्खेहिँ लंभइ पिओ लद्धो दुक्खेहिँ होइ साहीणो।
लद्धो वि अलद्धो च्चिअ जइ जह हिअअं तह ण होइ ॥
(दुःखैर्लभ्यते प्रियो लब्धो दुःखैर्भवति स्वाधीनः।
लब्धोऽप्यलब्ध एव यदि यथा हृदयं तथा न भवति ॥)

—*GS* IV. 5

128) ......*Śṛṅkhalā*...... (p. 166, v. 517)

सेले(?सेल)व्व जलहराणं सेलाणँ व जलणिही पुढविणाह।
जलहीणं विअ पाआलं सप्पुरिसाणँ तुमँ णिलओ ॥
(शैल इव जलधराणां शैलानामिव जलनिधिः पृथिवीनाथ।
जलधीनामिव पातालं सत्पुरुषाणां त्वं निलयः ॥)

129) ......*Śṛṅkhalā*...... (p. 166, v. 519)

इमिणा सरएण ससी ससिणा वि णिसा णिसाइ कुमुअवणं।
कुमुअ-वणेण वि पुलिणं पुलिणेण वि महइ(?सहइ)हंसउलं ॥
(अनया शरदा शशी शशिनापि निशा निशया कुमुद-वनम्।
कुमुदवनेनापि पुलिनं पुलिनेनापि शोभते हंसकुलम् ॥)

—Cf. *Līlāvaī* 25

130) ......*Śṛṅkhalā*...... (p. 167, v. 521)

कुलिसो तालेइ धराधरं(?धरे धरा)महिं कुलिस-खंडिअ-पतंतो (? पडंता)।
णिवडंत-सेल-पहआ मही वि सेसअ-फणा(?सेस-प्फणा)-वलअं ॥
(कुलिशस्ताडयति धराधरं महीं कुलिश-खण्डित-पतन्तः।
निपतच्छैलप्रहता मह्यपि शेषफणावलयम् ॥)

—*Gauḍavaho*. 129

31) 1......*Śṛṅkhalā*...... (p. 167, v. 524)

जह बालत्तण-लीला जोव्वणसमए जणाण हासेंति।
तारुण्णविलसिआइँ वि वअपरिणामे तह च्चेअ ॥
(यथा बालत्व-लीला यौवन-समये जनान् हासयन्ति।
तारुण्य-विलसितान्यपि वयःपरिणामे तथैव ॥)

132) ......*Śṛṅkhalā*...... (p. 168, v. 526)

माणो गुणेहिं जाअइ गुणा वि जाअंति सुअण-सेवाए।
विमलेण सुकअ-पसरेण सुअण-सेवाएँ उट्ठाणं ॥
(मानो गुणैर्जायते गुणा अपि जायन्ते सुजन-सेवया।
विमलेन सुकृत-प्रसरेण सुजनसेवाया उत्थानम् ॥)

—Later cited in *Vimarśinī*, p. 177

133) ......*Tadguṇaḥ*...... (p. 169, v. 530)

तं तुज्झ णूण दिण्णं हिमअर वडवग्गि-कालकूडेहिं ।
दूणोसि माणिणिं जह पहिअ-वहुं जह अ मारेसि ॥
(तत् तव नूनं दत्तं हिमकर वडवाग्नि-कालकूटाभ्याम् ।
दुनोषि मानिनीं यथा पथिकवधूं यथा च मारयसि ॥)

134) ......*Tadguṇaḥ*...... (p. 169, v. 531)

धवलो सि जइ वि सुंदर तह वि तुए मज्झ रंजिअं हिअअं ।
राअ-भरिए वि हिअए सुहअ णिहित्तो ण रत्तो सि ॥
(धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम् ।
राग-भृतेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥)

—*GS* VII. 65

135) ......*Vivekaḥ*...... (p. 172, v. 539)

पिअ-दंसण-सुह-रस-मउलिआइँ जइ से ण होंति णअणाइं ।
ता केण कण्ण-रइअं लक्खिज्जइ कुवलअं तिस्सा ॥
(प्रिय-दर्शन-सुख-रस-मुकुलिते यदि तस्या न भवतो नयने ।
तत्केन कर्णलग्नं लक्ष्यते कुवलयं तस्याः ॥)

—Cited earlier in *SK* III. v. 127

136) ......*Parabhāgaḥ*...... (p. 172, v. 542)

अण्ण-महिला-पसंगं दे देव करेसु अम्ह/मज्झ दइअस्स ।
पुरिसा एक्कंतरसा ण हु दोसगुणे विआणंति ॥
(अन्य-महिला-प्रसङ्गं प्रार्थये देव कुर्वस्माकं/मम दयितस्य ।
पुरुषा एकान्तरसा न खलु दोषगुणान् विजानन्ति ॥)

—*GS* I. 48

137) ......*Parabhāgaḥ*...... (p. 173, v. 543)

णूणं दाव सचीए/सईए बहुमण्णसि 'सुंदरो तुमं' सक्क ।
तेलोक्क-सुंदरी सा जाव ण णअणेसु संघडइ ॥
(नूनं तावत् शच्या बहुमन्यसे 'सुन्दरस्त्वम्' शक्र ।
त्रैलोक्य-सुन्दरी सा यावन्न नयनेषु संघटते ॥)

138) ......*Parabhāgaḥ*...... (p. 173, v. 545)

सो च्चेअ सुणइ सच्चं वअणं पिसुणाण अहिअकडुअं ति ।
जेण सहि कालकडो भक्खिज्जइ देहि-जीअ-हरो ॥
(स एव शृणोति सत्यं वचनं पिशुनाना मधिककटुकमिति ।
येन सखि कालकूटो भक्ष्यते देहिजीवहरः ॥)

139) ......*Udbhedaḥ*...... (p. 174, v. 547)

सूर-च्छलेण पुत्तय (?पुत्तिय) कस्स तुमं अंजलिं पणामेसि ।
हास-कडक्खुम्मीसा ण होंति/हुंति देवाण जोक्कारा ॥
(सूर्यच्छलेन पुत्रक (?पुत्रिके) कस्य त्वमञ्जलिं समर्पयसि ।
हास-कटाक्षोन्मिश्रा न भवन्ति देवानां जयकाराः/नमस्काराः ॥)

—*GS* IV. 32

140) ......*Udbhedaḥ*...... (p. 174, v. 548)

गहरइसु ओच्चिचएसु (?गहवइसुओच्चिचएसु) वि फलहीणेसु (?फलही-बोंडेसु)
उअह वहुआए ।
मोहं भमइ पुलइओ सेअगलंतंगुली/विलग्गसेअंगुली हत्थो ॥
(गृहपतिसुतोच्चितेष्वपि/-सुतावचितेष्वपि कर्पासफलेषु पश्यत वध्वाः ।
मोघं भ्राम्यति पुलकितो गलत्स्वेदाङ्गुलिर्हस्तः/विलग्नस्वेदाङ्गु-लिर्हस्तः ॥)

—*GS* IV. 59

The Prakrit text as printed, in the poona edition, along with its Sanskrit rendering, hardly makes any sense.

141) ......*Udbhedaḥ*...... (p. 174, v. 549)

परिओस-विअसिएहिं भणिअं अच्छीहिँ तेण जणमज्झे ।
पडिवण्णं तीअ वि उव्वमंत-सेएहिँ अंगेहिं ॥
(परितोष-विकसिताभ्यां भणितमक्षिभ्यां तेन जनमध्ये ।
प्रतिपन्नं तयाप्युद्वमत्स्वेदैरङ्गैः ॥)

—*GS* IV. 41

142) ......*Udbhedaḥ*...... (p. 174, v. 550)

अलिअ-पसुत्तअ-विणिमीलिअच्छ दे सुहअ मज्झ ओआसं ।
गंड-परिउंबणा-पुलइअंग ण पुणो चिराइस्सं ॥
(अलीक-प्रसुप्त-विनिमीलिताक्ष प्रार्थये/देहि सुभग ममावकाशम् ।
गण्ड-परिचुम्बना-पुलकिताङ्ग न पुनश्चिरायिष्यामि ॥)

—*GS* I. 20

143) ......*Udbhedaḥ*...... (p. 175, v. 555)

This *gāthā* " *Vihalaṁkhalaṁ,*" etc., is identical with the one recorded under S. No, (26) *supra.*

144) ......*Gūḍham*...... (p. 176, v. 556)

सामाइ सामलिज्जइ अद्धच्छिपलोइरीअ मुह-सोहा ।
जंबू-दल-कअ-कण्णावअंस-भरिए/-भमिरे हलिअ-पुत्ते ।।
(श्यामायाः श्यामलायते अर्धाक्षिप्रलोकनशीलाया मुखशोभा ।
जम्बू-दल-कृत-कर्णावतंस-भृते/भ्रमणशीले हालिक-पुत्रे ।।)

—*GS* II. 80

145) ......*Gūḍham*...... (p. 176, v. 559)

जइ देवरेण भणिआ खग्गं घेत्तूण वच्च राअउलं ।
ता कीस मुद्ध-मुहिआ सअणम्मि णिवेसअइ दिट्ठि ।।
(यदि देवरेण भणिता खड्गं गृहीत्वा व्रज राजकुलम् ।
तत् कस्मान्मुग्ध-मुखी शयने निवेशयति दृष्टिम् ।।)

—Cited earlier in *SK* II. v. 370

The *Vajjālagga* (S. No. 622, p. 170) reads this *gāthā* as follows :

जइ देवरेण भणिया खग्गं घेत्तूण राउले वच्च ।
ता कीस मुद्धडमुही हसिऊण पलोअए सेज्जं ।।
(यदि देवरेण भणिता खड्गं गृहीत्वा राजकुले व्रज ।
तत् कस्मान्मुग्धमुखी हसित्वा प्रलोकयति शय्याम् ।।)

The *Sarasvatīkaṇṭhābharaṇa* reads :

जइ देअरेण भणिआ खग्गं घेत्तूण राउलं वच्च ।
ता किं सेवअ-वहुए हसिऊण वलोइअं सअणं ।।
(यदि देवरेण भणिता खड्गं गृहीत्वा राजकुलं व्रज ।
तत् किं सेवक-वध्वा हसित्वावलोकितं शयनम् ।।)

—*SK* II. v. 370

The import of the *gāthā* ['*hiyālī*' (Sk : '*Hṛdayavatī*') a riddle *gāthā*, a *gāthā* with a subtle, hidden, overt meaning] in all the three texts however remains unchanged.

146) .. ...*Gūḍham*...... (p. 176, v. 560)

दट्ठूण पुण्णचंदं पोसिअ-पइआइ कीस पम्मुत्ता ।
चित्त-लिहिअस्स हरिणो चक्के रोसारुणा दिट्ठी ॥
(दृष्ट्वा पूर्णचन्द्रं प्रोषित-पतिकया कस्मात् प्रमुक्ता ।
चित्र-लिखितस्य हरेश्चक्रे रोषारुणा दृष्टिः ॥)

147) ......*Sūkṣman* . ... (p. 177, v. 561)

रच्छा-भरिमं (? भमिरं) जारं तरुणी दट्ठूण संकहेइ सहिं ।
एण्हि चर क्खु सूरो (? चरई सूरो) सरिअं संझाइ तह् यामो (? तज्जामो) ॥
(रथ्या-भ्रमणशीलं जारं तरुणी दृष्ट्वा संकथयति सखीम् ।
इदानीं चरति सूर्यः सरितं सन्ध्यायां तद् यामः ॥)

148) ......*Sūkṣmam*...... (p. 177, v. 562)

णोल्लेइ अणद्द/अणोल्लमणा अत्ता मं घर-भरम्मि सअलम्मि ।
खणमेत्तं जइ संझाइ होइ ण व होइ वीसामो ॥
(नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रमः ॥)

—Cited earlier in *KP* III. 18 (p. 77)

149) ......*Sūkṣmam*...... (p. 178, v. 565)

णिअ-कंठ-संठिओ किर विवरीअरओसुआएँ तरुणीए ।
'रेहइ तुज्झ' त्ति कओ हारो दइअस्स कंठम्मि ॥
(निज-कण्ठ-संस्थितः किल विपरीतरतोत्सुकया तरुण्या ।
'राजते तव' इति कृतो हारो दयितस्य कण्ठे ॥)

150) ......*Sūkṣma–(alaṁkāra–dhvaniḥ)*...... (p. 178, v. 566)

पाहुणिए तम्मग्गेण णेव तुएँ जवजवेण गंतव्वं ।
मा तत्थ तुज्झ अंगाणि कंटएहिं खविज्जंति ॥
(प्राघूर्णिके तन्मार्गेण नैव त्वयातिवेगेन गन्तव्यम् ।
मा तत्र तवाङ्गानि कण्टकैः क्षुभ्यन्ताम् ॥)

151) ......*Sūkṣma–(Alaṁkāra-dhvaniḥ)*...... (p. 179, v. 567)

परुस-वणे इह माए मिलाअ-/मिलाण-वअणं व तुमएँ गंतव्वं ।
मा तुह वि हारइज्जउ तअरिलआए वअण-सोहा ॥
(परुष-वने इह सखे म्लानवदनमिव त्वया गन्तव्यम् ।
मा तवापि ह्रियतां तगरि-लतया वदन-शोभा ॥)

152) ......*Vyājoktiḥ*...... (p. 179, v. 568)

गहवइ गओम्ह सरणं रक्खसु एअं त्ति अडअणा भणिरी ।
सहसागअस्स तुरिअं पइणो च्चिअ जारमप्पेइ ॥
(गृहपते गतोऽस्माकं शरणं रक्षैनमित्यसती भणनशीला ।
सहसागतस्य त्वरितं पत्युरेव जारमर्पयति ॥)

—*GS* III. 97

153) ......*Vyāioktiḥ*...... (p. 180, v. 570)

पक्खालणकवडेणं जारदंसणे चइअ-पुव्व-परिहाणा ।
कद्दमिअमहिलसई छिण्णाली पाउसासारे ॥
(प्रक्षालनकपटेन (-व्याजेन) जारदर्शने त्यक्त-पूर्व-परिधाना ।
कर्दमित (वस्त्रम्-) अभिलषति पुंश्चली (= असती कुलटा) प्रावृडासारे ॥)

154) ......*Vyāioktiḥ*...... (p. 180, v. 571)

अहअं लज्जालुइणी तस्स अ उम्मच्छराइँ पेम्माइं ।
सहिआ-अणो वि णिउणो अलाहि किं पाअराएण ॥
(अहं लज्जालुः (लज्जावती) तस्य चोद्भटानि (= च निरर्गलानि) प्रेमाणि ।
सखीजनोऽपि निपुणः, आस्तां किं पादरागेण ॥)

—*GS* II. 27

155) ......*Vyāioktiḥ*...... (p. 181, 574)

कस्स व ण होइ रोसो दट्ठूण पिआएँ सव्वणं अहरं ।
सभमर-पउमग्घाइणि (-ग्घाइरि) वारिअ-वामे सहसु एण्हिं ॥
(कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमर-पद्माघ्रायिणि/पद्माघ्राणशीले वारितवामे सहस्वेदानीम् ॥)

—Cited earlier in *DHV* (pp. 76–77)

156) ......*Vyājoktiḥ*...... (p. 183, v. 583)

मलअ-पवण-प्पहाविए माए मा णिवस हम्मिओआसे ।
पिअ-परिमल-लोहिआ (?-हिअहिअआ) मुद्धे तेणेव्व णिवसामि ॥
(मलय-पवन-प्रभाविते सखि मा निवस हर्म्यावकाशे ।
प्रिय-परिमल-लोभिता (हृत-हृदया) मुग्धे तेनैव निवसामि ॥)

157) ......*Svabhāvoktiḥ*...... (p. 185, v. 592)

धावइ विअलिअ-धम्मिल्ल-सिचअ-संजमण-वावड-करग्गा ।
चंदिल-भअ-विवलाअंत-डिंभ-परिमग्गिणी घरिणी/जणणी ॥
(धावति विगलित-धम्मिल (= केशपाश-) -सिचय-संयमन-व्यापृत-कराग्रा ।
चंदिल-(= नापित-) भय-विपलायमान-डिम्भ-परिमार्गिणी (= अन्वेषणशीला)
गृहिणी/जननी ॥)

—*GS* III. 91

158) ......*Bhāvikam*...... (p. 186, v. 594)

विसइ पडिप्पह-पत्थिअ-जण-विसर-णिमिज्जमाण-विच्छेअं ।
णवडंतरोम्मुहं (?) कहं वि (? णिरंतर-उम्मुहं कह) वि गोहणं गामरच्छासु ॥
(विशति प्रतिपथ-प्रस्थित-जन-विसर-निर्मीयमाण-विच्छेदम् ।
निरन्तरोन्मुखं कथमपि गोधनं ग्राम-रथ्यासु ॥)

159) ......*Bhāvikam*...... (p. 187, v. 596)

एंति गअण-पेरंतसु/गअणोसंरतेसु कहं वि उम्मुह-समीर-हीरंता ।
थोओप्पाअ/थोअाप्पइअ-णिविट्ठा सेलेसु विहंग-संघाआ ॥
(आयन्ति (आगच्छन्ति) गगन-पर्यन्तेषु कथमप्युन्मुख-समीर-ह्रियमाणाः ।
स्तोकोत्पात/स्तोकोत्पतित-निविष्टाः शैलेषु विहङ्ग-सङ्घाताः ॥)

—*Gauḍavaho* 233

160) ......*Rasavat*...... (p. 190, v. 602)

संकेओसुअमणओ गहवइ-धूआ-कडक्ख-सच्चविओ ।
ता......ण चेअइ (? तंबं गअं ण वेअइ) गोउर (? गोवालो) अंबरं धोई ॥
(सङ्केतोत्सुकमना गृहपति-दुहितृ-कटाक्षावलोकितः ।
गां गतां न वेत्ति गोपालोऽम्बरं दोग्धि ॥)

161) ......*Rasavat*...... (p. 191, v. 603)

This *gāthā* as is presented in the printed text is quite corrupt. It is found in its correct form in the *Gāthāsaptaśatī* :

ता रुण्णं जा रुव्वइ ता छीणं/क्खीणं जाव खिज्जइ अंगं ।
ता णीससिअं वरइएँ जाव अ सासा पहुप्पंति ॥
(तावद् रुदित् यावद् रुद्यते तावत् क्षीणं यावत् क्षीवतेऽङ्गम् ।
तावन्निःश्वासितं वराक्या यावत् श्वासाः प्रभवन्ति ॥)

—*GS* II. 41

162) ......*Alamkāra–cchāyā–saṁkaraḥ*...... (p. 192, v. 609)

काऊण हिरण्णक्खं पढमं जम-दंसण-गोअरं जेण ।
णीआ णिअ-दंसण-पहं वसुहा तं सूअरं णमह ॥
(कृत्वा हिरण्याक्षं प्रथम-यम-दर्शन-गोचरं येन ।
नीता निज-दर्शन-पथं वसुधा तं सूकरं नमत ॥)

163) ......*Saṁkaraḥ*...... (p. 203, v. 627)

This *gāthā* " *Aṇṇattha kuṇasu* " etc., is the same as verse no. 453 (p. 146) of the text (Vide S. No. 109) *supra.*

164) ......*Saṁkaraḥ*...... (p. 203, v. 628)

तावमवणेइ ण तहा चंदणपंको वि कामि-मिहुणाणं ।
जह दुस्सहे वि गिम्हे अण्णोण्णालिंगण-महल्ली (? सुहेल्ली) ॥
(तापमपनयति न तथा चन्दनपङ्कोऽपि कामि-मिथुनानाम् ।
यथा दुःसहेऽपि ग्रीष्मेऽन्योन्यालिङ्गनसुखम् ॥)

Note : Hemacandra records in his *Desī-sadda saṁgaha* (Pt. Bechardās's edition, p. 280) :
' *Suhe suhellī a* ı/ He further adds : " *suhallī* " *iti anye* ı/

165) ......*saṁkaraḥ*...... (p. 204, v. 630)

चंदसरिसं मुहं से सरिसो अमएण/अमअस्स मुहरसो तिस्सा ।
सकअग्गह-णभासु (? रहसु) ज्जल-चुंबणं कस्स सरिसं से ॥
(चन्द्र-सदृशं मुखं तस्याः सदृशोऽमृतेन/अमृतस्य मुखरसस्तस्याः ।
सकचग्रह-रभसोज्ज्वल-चुम्बनं कस्य सदृशं तस्याः ॥)

—*GS* III. 13

166) ......*Saṁkaraḥ*...... (p. 204, v. 631)

मरणाहिंतो अहिअं ण दुक्करं अत्थि जीवलोअम्मि ।
उप्पज्जइ तद्दुक्खं (? तं दुक्खं) मरणं जस्सोसहं होइ ॥
(मरणादधिकं न दुष्करमस्ति जीवलोके ।
उत्पद्यते तद्दुक्खं मरणं यस्यौषधं भवति ॥)

167) ......*Saṁkaraḥ*...... (p. 204, v. 632)

रक्खउ वो दर-पीअ-त्थणस्स बीअं थणं पि मग्गंतो ।
हत्थो हर-हरिअ-उरद्ध-भाग-भमिरो कुमारस्स ॥
(रक्षतु वो दर-पीत-स्तनस्य द्वितीयं स्तनमपि मार्गयन् ।
हस्तो हर-हृतोरोऽर्धभाग-भ्रमणशीलः कुमारस्य ॥)

168) ......*Saṁkaraḥ*...... (p. 205, v. 634)

एक्केण कवड-बलि-बंधणेण भुवणे ण माइ गोविंदो ।
अच्छरिअं भमइ पिआ ओणमिअ-मुही (?ओणअ-मुहि) तिवलि-बंधेवि ॥
(एकेन कपट-बलि-बन्धनेन भुवने न माति गोविन्दः/गोपेन्द्रः ।
आश्चर्यं भ्रमति प्रियावनतमुखी त्रिवलि-बन्धेऽपि ॥)

Chapter XIX

Prakrit Verses In Rasagaṅgādhara*

In one of his introductory verses to the *Rasagaṅgādhara* Jagannātha Paṇḍita, the last great writer on Sanskrit Poetics (C. 1620-1665), proudly declares that all the examples cited in this work on poetics are his own and he has not borrowed from other poet's works.[1] All these examples are in *Sanskrit.* We come across hardly half a dozen verses in *Prakrit* which he quotes from Mammaṭa's *Kāvyaprakāśa* in the course of his theoretical discussions :

1) *Bhama dhammia vīsattho......* (p. 15)

भम धम्मिअ वीसत्थो/वीसद्धो सो सुणओ अज्ज मारिओ तेण ।
गोला-णइ-कच्छ-कुडंग-वासिणा दरिअ-सीहेण ।।
(भ्रम धार्मिक विश्वस्तः/विस्रब्धः स शुनकोऽद्य मारितस्तेन ।
गोदा-नदी-कच्छ-कुञ्ज (= लतागहन-) वासिना दृप्त-सिंहेन ।।)

This *gāthā* (*GS* II. 75) is cited in *Kāvyaprakāśa* (p. 253).

2) *Auṇṇiddaṁ dobballaṁ......* (p. 16)

ओण्णिद्दं दोब्बल्लं चिंता अलसत्तणं सणीससिअं ।
मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ ।।
(औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः संबन्धि सखि तवप्यहह परिभवति ।।)

This *gāthā* is cited in *Kāvyaprakāśa* (p. 73).

---

* The Rasagaṅgādhara by Jagannātha Paṇḍita, with the commentary of Nageśa Bhaṭṭa, Kāvyamālā 12, 5th edition, " Nirṇaya-Sāgar. " Press, Bombay, 1939.

1) निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ।।

—*Rasagaṅgādhara* p. 3

3) *Ale le saddah (?) samuppāḍia......* (p. 65)

This speech of *Vidūṣaka* is in prose :

'अले ले सज्जो समुप्पाडिअ-हरिय-कुसगंथिमयाच्छमाला-पइविति (?-परिविति)-विस्संभिअ बालविहवंदःकअणा (? बालविहवंदक्करणा) वम्हणा...
(' अरे रे सद्यः समुत्पाटित-हरित-कुश-ग्रन्थिमयाक्षमाला-परिवृत्ति विस्रम्भित-बाल-विधवान्तःकरणा ब्राह्मणाः ')

4) *Eddahahamettatthaṇiā......* (p. 155)

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहि अच्छिवत्तेहिं ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिँ दिअहेहिं ॥
(एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥)

This *gāthā* [*GS* (*W*) 973] is cited in *Kāvyaprakāśa* (p. 67).

5) *Ḍhuṁḍhuṁṇaṁto hi marīhisi......* (p. 215)

And,

6) *Ḍhuṇḍhulanto narīhasi......* (p. 278)

These two verses are not independent *gāthās* but they are identical with slight difference in the opening words :

ढुंढुल्लंतु मरीहिसि/मरीहसि कंटअकलिआइं केअइवणाइं ।
मालइ-कुसुमेण समं भमर भमंतो न पाविहिसि ॥
(गवेषयन् मरिष्यसि कण्टक-कलितानि केतकीवनानि ।
मालती-कुसुमेन समं भ्रमर भ्रमन् न प्राप्स्यसि ॥)

This *gāthā* [*GS* (*W*) 985] is cited in *Kāvyaprakāśa*, (p. 574). with a few variants.

Note : Hemacandra states in his Prakrit Grammar that '*ḍhuṇḍhulla*' may be used for $\sqrt{\textit{gaveṣ}}$ (VIII. 4.189) or for $\sqrt{\textit{bhram}}$ (VIII. 4.161).

Chapter XX

Viśveśvara's Alaṁkāra-Kaustubha* : Prakrit Text Restored

In his " Index of authors and works on Sanskrit Poetics " P. V. Kane records five works by different authors bearing the name *Alaṁkārakaustubha.* Here we are concerned with the *Alaṁkārakaustubha* of Viśveśvara Pandit who flourished in the ' First half of the 18th century.' In this work there are over one hundred Prakrit verses quoted by Viśveśvara to illustrate various figures of speech. With one or two exceptions these verses are easily traceable to their sources :

1) *Ukkhaadumaṁ va selaṁ* (p. 28)

उक्खअ-दुमं व सेलं हिम-हअ-कमलाअरं व लच्छि-विमुक्कं ।
पीअ-मइरं व चसअं बहुल-पओसं व मुद्धअंदविरहिअं ।।
(उत्खातद्रुममिव शैलं हिमहतकमलाकरमिव लक्ष्मी-विमुक्तम् ।
पीतमदिरमिव चषकं बहुल-प्रदोषमिव मुग्धचन्द्रविरहितम् ।।)

—*Setu* II. 5 (Calcutta edn)
— ,, II. 11 (NS edn)

2) *Ua ṇiccalaṇippandā......* (p. 35)

उअ णिच्चल-णिप्पंदा भिसिणी-पत्तम्मि रेहइ बलाआ ।
णिम्मल-मरगअ-भाअण-परिट्ठिआ संख-सुत्ति व्व ।।
(पश्य निश्चल-निष्पन्दा बिसिनी-पत्रे राजते बलाका ।
निर्मल-मरकत-भाजन-परिस्थिता शङ्खशुक्तिरिव ।।)

—*GS* I. 4

3) *Saṁjhārāutthaio......* (p. 36)

संझाराउत्थइओ दीसइ गअणम्मि पडिवआ-अंदो ।
रत्त-दुऊलंतरिओ व्व णह-णिहाओ णव-वहूए ।।
(सन्ध्या-राग-स्थगितो दृश्यते गगने प्रतिपदा-चन्द्रः ।
रक्त-दुकूलान्तरित इव नखनिघातो नव-वध्वाः ।।)

—Cf. *GS* VI. 69

---

* The *Alaṅkāra-Kaustubha* of Viśveśvara Paṇḍit with his own gloss, ed by M. M. Pandit Śivadatta and K. P. Parab, Kāvyamālā. 66, " Nirnaya–Sagara " Press, Bombay, 1898.

4) *Ajjāi ṇilakañcua......* (p. 36)

अज्जाइ णील-कंचुअ-भरिदुच्चरिअं(-भरिउव्वरिअं) विहाइ थणवट्टं ।
जल-भरिअ-जलहरंतर-दरुग्गअं चंदबिंबं व ॥
(आर्याया नीलकञ्चुक-भरितोच्चारितं(-भृतोर्वरितं) विभाति स्तनपृष्ठम् ।
जल-भृत-जलधरान्तरदरोद्गतं चन्द्रबिम्बमिव ॥)

—*GS* IV. 95

5) *Acchīi tā thaissaṁ......* (p. 38)

अच्छीइँ ता थइस्सं दोहिँ वि हत्थेहिं तम्मि दिट्ठम्मि ।
अंगं कलंब-कुसुमं व मउलिअं(?पा. भे. पुलइअं) कहँ णु ढक्किस्सं ॥
(अक्षिणी तावत् स्थगयिष्यामि द्वाभ्यामपि हस्ताभ्यां तस्मिन्दृष्टे ।
अङ्गं कदम्ब-कुसुममिव मुकुलितं(पा. भे. पुलकितं) कथं नु छादयिष्यामि ॥)

—*GS* IV. 14

6) *Viasiatamālaṇīlaṁ......* (p. 38)

